स्वेष्टलिङ्गमुदीरितम्"। लिङ्गं च द्विविधमकृत्रिमं कृत्रिमञ्च अकृत्रिमं स्वयम्भुवाणलिङ्गादि स्वयम्भूतम्। कृत्रिमं धातुलिङ्गादिनिर्म्मितम्। सिद्धान्तशेखरे "तल्लिङ्गं द्विविधं प्रोक्तमचलञ्च चलं तथा। प्रत्येकं त्रिविधं ज्ञेयं लिङ्गं तदुभयात्मकम्। प्रासादे स्थापितं लिङ्गमचलं तच्छिलादिजम्। स्थापितमचलं गेहे स्थिरं लिङ्गमयोजिते। पञ्चधा तत्र स्थितं लिङ्गं स्वयम्भु दैवपालितम्। आर्षञ्च मानसं लिङ्गं तेषां लक्षणमुच्यते। नानाच्छिद्रसमायुक्तं नानावर्णसमन्वितम्। अदृष्टमूलं यल्लिङ्गं कर्कशं भुवि दृश्यते। तल्लिङ्गन्तु स्वयम्भूतमपरं लक्षणाच्युतम्। स्वयम्भुलिङ्गमित्युक्तं तच्च नानाविधं मतम्। शङ्खाभमस्तकं लिङ्गं वैष्णवं तदुदाहृतम्। पद्माभमस्तकं ब्राह्मं छत्राभं शाक्तमुच्यते। शिरोयुग्मं तथाग्नेयं त्रिपदं याम्यमीरितम्। खड्गाभं नैरृतं लिङ्गं वारुणं कलशाकृति। वायव्यं ध्वजवल्लिङ्गं कौबेरन्तु गदान्वितम्। ईशानस्य त्रिशूलाभं लोकपालादि निःसृतम्। स्वयम्भुलिङ्गमाख्यातं सर्वशास्त्रविशारदैः"। मत्स्यसूक्ते "दृष्ट्वा लिङ्गं महेशस्य स्वयम्भूतस्य पार्वति!। सर्वपापविनिर्म्मुक्तः परे ब्रह्मणि लीयते"। एतेषां पूजाफलन्तु तत्रैव "विशेषाच्चैतल्लिङ्गं मुक्त्यै भुक्तये चानुपक्वतः। पार्थिवं भुक्तये मत्स्यं मुक्तये चानुपक्वतः। एवं वै दारुजं ज्ञेयं धातुलिङ्गं तथा पुनः। स्थिरलक्ष्मीप्रदं ज्ञेयं हैमं राज्यप्रदञ्च तत्। पुत्त्रवृद्धिकरं ताम्रं राङ्गमायुःप्रवर्द्धनम्" पद्मपु० "पारदञ्च महाभूत्यै सौभाग्याय च मौक्तिकम्। चान्द्रकान्तं मृत्युजित् स्याद्धाटकं सर्वकामदम्"। वी०मि०धृत कल्पोत्तरेऽपि "सर्वा फलप्रदा भूमिर्मणयस्तद्वदेव हि। अनन्ताद्याः स्मृता ह्यष्टौ मणयो विद्युदुज्ज्वलाः। रात्रौ प्रकाशकाः सर्वे विषाद्याघातकारिणः। नानावर्णास्तु विज्ञेया रसैर्गन्धैश्च रूपतः। वज्राद्याः स्फाटिकाद्याश्च गुडाद्यादिविनिर्म्मितम्। सर्वकामप्रदं पुंसां लिङ्गं तात्कालिकं मतम्"। लक्षणसमुच्चये "गान्धं सौभाग्यदं लिङ्गं पौष्पं मुक्तिप्रदायकम्"। तथा "नानागुणोद्भवं लिङ्गं नानाकामप्रदायकम्। सैकतं शुभदं लिङ्गं सौभाग्याय च यावनम्। उच्चाटने तु पालाशं भास्मं शत्रुक्षयावहम्। तात्कालिकं दरिद्रश्च कृत्वा भक्त्या समर्चयेत्"। तथा "कस्तूरिकाया द्वौ भागौ चत्वारश्चन्दनस्य च। कुङ्कुमस्य त्रयश्चैव शशिना च चतुःसमम्।

एतद्वै गन्धलिङ्गन्तु कृत्वा संपूज्य भक्तितः। शिवसायुज्यमाप्नोति बन्धुभिः सहितो नरः। कार्य्यं पुष्पमयं लिङ्गं हयमन्त्रसमन्वितम्। नवखण्डां धरां भुक्त्वा गणेशोऽधिपतिर्भवेत्। रजोभिर्निर्म्मितं लिङ्गं यः पूजयति भक्तितः। विद्याधरपदं प्राप्य पश्चात् शिवसमो भवेत्। श्रीकामो गोशकृल्लिङ्गं कृत्वा भक्त्या प्रपूजयेत्। स्वच्छेन कापिलेनैव गोमयेन प्रकल्पयेत्। कार्य्यं च सप्तिजं लिङ्गं यवगोधूमशालिजम्। श्रीकामः पुष्टिकामश्च पुत्त्रकामस्तदर्चयेत्। सिताखण्डमयं लिङ्गं कार्य्यमारोग्यवर्द्धनम्। वश्ये लवणजं लिङ्गं तत्ते त्रिकटुकान्वितम्। गव्यघृतमयं लिङ्गं संपूज्य बुद्धिवर्द्धनम्। लवणेन च सौभाग्यं पार्थिवं सर्वकामदम्। कामदं तिलपिष्टोत्थं तुषोत्थं मारणे स्मृतम्। भस्मोत्थं सर्वफलदं गुडोत्थं प्रीतिवर्द्धनम्। गन्धोत्थं गुणदं भूरिशर्करोत्थं सुखप्रदम्। वंशाङ्कुरं वंशकरं गोमयं सर्वरोगदम्। केशास्थिसम्भवं लिङ्गं सर्वशत्रुविनाशनम्। लोमजं मारणे पिष्टसम्भवं लिङ्गमुत्तमम्। दारिद्र्यदं द्रुमोद्भूतं पैष्टं सारस्वतप्रदम्। दधिदुग्धोद्भवं लिङ्गं कीर्त्तिलक्ष्मीसुखप्रदम्। धान्यदं धान्यजं लिङ्गं फलोत्थं फलदं भवेत्। पुष्पोत्थं दिव्यभोगायुर्मुक्त्यै धात्रीफलोद्भवम्। नवनीतोद्भवं लिङ्गं कीर्त्तिसौभाग्यवर्द्धनम्। दूर्वाकाण्डसमुद्भूतमपमृत्युविनाशनम्। कर्पूरसम्भवं लिङ्गं कलायैर्भुक्तिमुक्तिदम्। आयस्कान्तं चतुर्द्धा तु ज्ञेयं सामान्यसिद्धिषु" गरुडपु०। "सर्वं मणिभवं श्रेष्ठं तत्र वाजमरिच्छिदे। यमलिङ्गं महाभूत्यै सौभाग्याय च मौक्तिकम्। पुष्टिमूलं महानीलं ज्योतिस्तीरसमुद्भवम्। सर्वकं कुलसम्पत्त्यै तैजसं सूर्य्यकान्तजम्। चन्द्रापीडं मृत्युजितं स्फाटिकं सर्वकामदम्। शूलाख्यमणिजं शत्रुक्षयार्थं मौक्तिकं तथा। आपत्यं हीरकं ज्ञेयं रोगहृन्मौक्तिकोद्भवम्। शुभकृत् पुष्करं नीर्षं वैदूर्य्यं शत्रुदर्पहृत्। नीलं लक्ष्मीप्रदं ज्ञेयं स्फाटिकं सर्वकामदम्"। सारसंग्रहे "महाभुक्तिप्रदं हैमं राजतं भूतिवर्द्धनम्। आरकूटं तथा कांस्यं त्रपुणा सामान्यसुक्तिदम्। त्रपुसीसायसं लिङ्गं शत्रूणां नाशने हितम्। कीर्त्तिदं कांहजं लिङ्गं राजतं पुत्त्रवर्द्धनम्। पैत्तलं भुक्तिमुक्त्यर्थं शिवजं सर्वसिद्धिदम्" कालोत्तरतन्त्रम्। तत्रैव शिवनारदसंवादे "पितॄणां मुक्तये लिङ्गं पूज्यं रजतसम्भवम्। हैमजं सत्यलोकस्य प्रा-